श्रीमते लक्ष्मीहयवदनपरब्रह्मणे नमः ॥

श्रीमते श्रीवण्शठकोपश्री वेदान्तदेशिकयतीन्द्रमहादेशिकाय नमः ॥

## भूमिका ।

प्रथितमेवैतत् श्रीमद्भगवद्रामानुजदर्शनानुयायिनां समेषां यत् कवितार्किकसिंह, सर्वतन्त्रस्वतन्त्र, वेदान्ताचार्यादि दिव्य-दम्पतिप्रसादलब्ध विरुदभाजां श्रीमद्वेङ्कटनाथाख्याचार्यसार्वभौमानां परश्शतग्रन्थैः विशिष्टाद्वैतदर्शनं सर्वतोभद्रं वरीवर्तीति । ते चाचार्याः स्वतन्त्र-शास्त्र-काव्य-नाटकादि-ग्रन्थैः, पूर्वाचार्यग्रन्थव्याख्यान, स्तोत्र, प्रकरण, रहस्य, दिव्यप्रबन्ध, सिद्धान्त-रक्षार्थादि-बहुविधाभिः सांस्कृतीभिः द्रामिडीभिः तन्मिश्राभिः च बह्वीभिः कृतिभिः संसारार्णवे निमज्जतो जनान् समुज्जीवयामासुः इति देववत् भक्त्या सदोपास्याः भवन्ति तत्परम्परागतैः ।

ऐषमे तेषां सार्धसप्तशततमावतारसंवत्सरे तद्ग्रन्थानुसन्धान, तदर्थानुभव, परस्परबोधन, तदुत्सवा-चरणादि बहुप्रकारैः विद्वद्भिः सामान्यैश्च वेदान्तदेशिकदर्शनानुयायिभिः तत्सेवा सभक्तिश्रद्धं क्रियते । सा च आचार्याणां विभवकाले तैः समलङ्कृते, कावेरीमहानदीतटस्थे अतिप्रशान्त-सत्यागालाख्य-क्षेत्रपरिसरे तदाराध्यश्रीलक्ष्मीहयास्यसन्निधौ तदुपज्ञ श्रीब्रह्मतन्त्र-स्वतन्त्र-पर-कालमठाराधकाचार्योत्तमानां परमहंसपरिव्राजकादिबिरुदावलीविभूषितानां श्रीमदभिनववागी-शब्रह्मतन्त्रस्वतन्त्रपरकालस्वामिपादानां दिव्याध्यक्ष्ये सम्पत्स्यत इति तादृशशुभावसरे तत्पुत्रैः शिष्यैश्च रचितान् कांश्चनामुद्रितान् क्रोडपत्र-रूपान् सिद्धान्तग्रन्थान् प्रकाशयितुम् उत्सुकाः तद्भक्ताः मद्रपुरीस्थ-अड्यार्-ग्रन्थालयात् तन्मातृकाः प्राप्य, तासां मुद्रणोप-युक्त-टङ्कणादिकं विधाप्य, विषयशोधनं सम्पादनं च कीर्तिशेषैः महामहोपाध्यायैः सर्वतन्त्रकुशलैः आत्मगुणपूर्णैः पैयम्बाडि चेट्टलूरु श्री उ.वे. श्रीवत्साङ्काचार्य स्वामिभिः कारयित्वा प्रवर्तन्ते श्रीमत्परकालमठा-स्थानशिष्यश्रेणीनिष्ठाः इति प्रशंसार्होऽयं विषयः । अस्य ग्रन्थस्य पठनाधिगमप्रचारादिना आचार्य-माहात्म्यप्रथनं सुकृतलभ्यं महत्कृत्यं भगवद्भागवतानुग्रहाय कल्पेतेति सर्वे तत्रान्वित्य कृतार्था भवन्त्वित्याशासे ॥

प्रकाश्यमानग्रन्थविवरणमित्थम् –

**श्रीकुमारवरदाचार्यग्रन्थमाला – प्रथमः भागः,**

**वादिभीकर अण्णन् स्वामिनाम् एवं विशिष्ट कतिपय पूर्वाचार्यग्रन्थाश्च**

**सम्पादकः – महामहोपाध्यायः पैयम्बाडि चेट्टलूरु श्री उ.वे. श्रीवत्साङ्काचार्य स्वामी**

**प्रकाशिका – श्रीवेदान्तदेशिकविहारसभा, श्रीब्रह्मतन्त्रस्वतन्त्रपरकालस्वामिमठास्थानम् ।**

**अत्र संगृहीताः ग्रन्थाः** –

श्रीमत्कुमारवरदाचार्याणां कृतिषु

१. प्रपञ्च-मिथ्यात्वानुमान-खण्डनम्

२. आश्रयानुपपत्तिः

३. तिरोधानानुपपत्तिः

४. स्वरूपानुपपत्तिः

५. लक्षणानुपपत्तिः

६. प्रमाणानुपपत्तिः

श्रीवादिभीकर अण्णन् महादेशिकानां कृतिषु

१. अभेदखण्डनम्

अन्येषां विशिष्ट कतिपय पूर्वाचार्याणां कृतयः

१. अविद्याखण्डनम्

२. भेदसमर्थनम्

३. परततत्त्वनिश्चयः

यद्यपि एते विषयाः आचार्याणामेव ग्रन्थेषु सूचिता उपलभ्यन्ते, तथापि तत्र संक्षिप्तानां विस्तारः, सयुक्ति प्रयोगाः, शैलीभेदेन प्रतिपादनं, केषाञ्चन नूतनविषयाणां प्रस्तावः इत्यादयोंशाः अत्र अनुभाव्याः सन्ति । क्वचित् किञ्चित् विशेषन्यायः ग्रन्थकर्तृभेदे सर्वत्र प्रसिद्ध एव । श्रीमति रहस्यत्रयसारे 'अशिथिलगुरुभक्तिस्तत्प्रशंसादिशीलः प्रचुरबहुमतिस्तद्वस्तुवास्त्वादिकेऽपि' इति शिष्यकृत्यत्वेन आचार्यैरेव नियमत्वेन अनुगृहीतत्वात् तत्पुत्र, शिष्येष्वपि भक्तिगौरवादिप्रदर्शनं अवश्यापेक्षितं शिष्यस्वरूप-लाभाय । गुरुपरम्पराप्रविष्ट सर्वाचार्यपुरस्कारः च एतदास्वादनेन फलति ॥

अस्मिन् अभिनन्दनीयकैङ्कर्ये दासस्यापि कथंचित् अन्वयः सुकृतपरिपाकेन संजात इति तद्धेतुभूताचार्यचरणनलिनयोः अनन्तप्रणतिततीः समर्प्य विरमामि ॥

इति निवेदयिता

शोकहर्तृपुराभिजनः रामानुजदासः

बॆंगलूरु

9.11.2018